# gopAlastotram

# ગોપાલસ્તોત્રં અથવા ગોપાલસ્તવરાજસ્તોત્રમ્

## Document Information

Text title : gopAlastotra

File name : gopaalastotra.itx

Category : stavarAja, vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : nAradapa.ncharAtra

Latest update : January 16, 2005, January 22, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગોપાલસ્તોત્રં અથવા ગોપાલસ્તવરાજસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।

શ્રીમદ્ગોપીજનવલ્લભાય નમઃ ।
ૐ અસ્ય શ્રીગોપાલસ્તવરાજમન્ત્રસ્ય શ્રીનારદ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીકૃષ્ણઃ પરમાત્મા દેવતા ।
શ્રીકૃષ્ણપ્રીત્યર્થે જપે વિનોયોગઃ ॥

અથ ધ્યાનમ્ ।
સજલજલદનીલં દર્શિતોદારશીલં
કરતલધૃતશૈલં વેણુવાદ્યૈ રસાલમ્ ।
વ્રજજનકુલપાલં કામિનીકેલિલોલં
તરુણતુલસિમાલં નૌમિ ગોપાલબાલમ્ ॥

શ્રીનારદ ઉવાચ ।
નવીનનીરદશ્યામં નીલેન્દીવરલોચનમ્ ।
બલ્લવીનન્દનં વન્દે કૃષ્ણં ગોપાલરુપિણમ્ ॥ ૧॥

સ્ફુરદ્બર્હિદલોદ્બદ્ધનીલકુઞ્ચિતમૂર્ધજમ્ ।
કદમ્બકુસુમોદ્બદ્ધવનમાલાવિભૂષિતમ્ ॥ ૨॥

ગણ્ડમણ્ડલસંસર્ગિચલત્કુઞ્ચિતકુન્તલમ્ ।
સ્થૂલં મુક્તાફલોદારહારોદ્યોતિતવક્ષસમ્ ॥ ૩॥

હેમાઙ્ગદતુલાકોટિકિરીટોજ્જ્વલવિગ્રહમ્ ।
મન્દમારુતસંક્ષોભચલિતામ્બરસઞ્ચયમ્ ॥ ૪॥

રુચિરૌષ્ઠપુટન્યસ્તવંશીમધુરનિઃસ્વનૈઃ ।
લસદ્ગોપાલિકાચેતો મોહયન્તં પુનઃ પુનઃ ॥ ૫॥

બલ્લવીવદનામ્ભોજમધુપાનમધુવ્રતમ્ ।
ક્ષોભયન્તં મનસ્તાસાં સસ્મેરાપાઙ્ગવીક્ષણૈઃ ॥ ૬॥

યૌવનોદ્ભિદેહાભિઃ સંસક્તાભિઃ પરસ્પરમ્ ।
વિચિત્રામ્બરભૂષાભિર્ગોપનારીભિરાવૃતમ્ ॥ ૭॥

પ્રભિન્નાઞ્જનકાલિન્દીજલકેલિકલોત્સુકમ્ ।
યોધયન્તં ક્વચિદ્ગોપાન્ વ્યાહરન્તં ગવાં ગણમ્ ॥ ૮॥

કાલિન્દીજલસંસર્ગિશીતલાનિલસેવિતે ।
કદમ્બપાદપચ્છાયે સ્થિતં વૃન્દાવને ક્વચિત્ ॥ ૯॥

રત્નભૂધરસંલગ્નરત્નાસનપરિગ્રહમ્ ।
કલ્પપાદપમધ્યસ્થહેમમણ્ડપિકાગતમ્ ॥ ૧૦॥

વસન્તકુસુમામોદસુરભીકૃતદિઙ્મુખે ।
ગોવર્ધનગિરૌ રમ્યે સ્થિતં રાસરસોત્સુકમ્ ॥ ૧૧॥

સવ્યહસ્તતલન્યસ્તગિરિવર્યાતપત્રકમ્ ।
ખણ્ડિતાખણ્ડલોન્મુક્તમુક્તાસારઘનાઘનમ્ ॥ ૧૨॥

વેણુવાદ્યમહોલ્લાસકૃતહુઙ્કારનિઃસ્વનૈઃ ।
સવત્સૈરુન્મુખૈઃ શશ્વદ્ગોકુલૈરભિવીક્ષિતમ્ ॥ ૧૩॥

કૃષ્ણમેવાનુગાયદ્ભિસ્તચ્ચેષ્ટાવશવર્તિભિઃ ।
દણ્ડપાશોદ્યતકરૈર્ગોપાલૈરુપશોભિતમ્ ॥ ૧૪॥

નારદાદ્યૈર્મુનિશ્રેષ્ઠૈર્વેદવેદાઙ્ગપારગૈઃ ।
પ્રીતિસુસ્નિગ્ધયા વાચા સ્તૂયમાનં પરાત્પરમ્ ॥ ૧૫॥

ય એવં ચિન્તયેદ્દેવં ભક્ત્યા સંસ્તૌતિ માનવઃ ।
ત્રિસન્ધ્યં તસ્ય તુષ્ટોઽસૌ દદાતિ વરમીપ્સિતમ્ ॥ ૧૬॥

રાજવલ્લભતામેતિ ભવેત્સર્વજનપ્રિયઃ ।
અચલાં શ્રિયમાપ્નોતિ સ વાગ્મી જાયતે ધ્રુવમ્ ॥ ૧૭॥

॥ ઇતિ શ્રીનારદપઞ્ચરાત્રે જ્ઞાનામૃતસારે
ચતુર્થરાત્રે ગોપાલસ્તવરાજઃ સમ્પૂર્ણઃ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*gopAlastotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*